
ISSN 2249-829X



# संस्कृति सौरभम् शोध पत्रिका



प्रकाशक

संस्कार–भारती मानव कल्याण संस्थान जयपुर (राज.)

बी–23, भूरापटेल नगर, पोस्ट–हीरापुरा, अजमेर रोड़, जयपुर (राज.) 302021

E-mail : sanskritisaurabham@gmail.com, sbmksj2001@gmail.com

# श्रीमद्भगवद्गीतायां पुष्पिकावाक्यविचारः

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दन।**
**पार्थो वत्सः सुधीर्भोक्त दुग्धं गीतामृतं महत्॥**

धर्मार्थकाममोक्ष इति पुरुषार्थचतुष्टयं मानवजीवनस्य उद्देश्यम्। अस्योद्देश्यस्य प्राप्तर्थं धर्मशास्त्रम्, अर्थशास्त्रं, कामशास्त्रं, मोक्षशास्त्रं च अवलम्बनीयं भवति। एतेषां चतुर्णां शास्त्राणां द्वैविध्यं वक्तुं शक्यते–ऐहिकं पारलौकिकञ्च। सुभाषितेऽपि– "**विद्या तु वैदुष्यमुपार्जयन्ती जागर्ति लोकद्वयसाधनाय**" इत्युक्तं भवति। अथ च वैशेषिकसूत्रं "**यतोऽभ्युदयनिः श्रेयससिद्धि स धर्मः**[1]" इत्यनेन शास्त्राणां द्वैविध्यं सङ्केतयति। एवञ्च सति धर्मार्थकामनां त्रिविधानामुद्देश्यानां तत्सम्बद्धानां शास्त्राणाञ्च साधनत्वं मोक्षशास्त्रस्य च साध्यत्वं सम्पद्यते। अपि चोक्तमुपनिषदि–"**द्वे विद्ये वेदितव्ये.....परा चैवापरा च। अथ तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते**[2]" इति। यया विद्यया लौकिकं ज्ञानं जायते सा अपरा विद्या। यया च अक्षरब्रह्मविषयकं ज्ञानं जायते सा परा विद्या इत्युच्यते। किन्तु दार्शनिकानां दृष्ट्या जीवनस्य विद्यायाश्च एकमेव उद्देश्यं भवितुमर्हति तदस्ति–अमृतत्वम्। अत एव "**सा विद्या या विमुक्तये**[3]" "**विद्ययामृतमश्नुते**[4]" "**विद्यया विन्दतेऽमृतम्**[5]" इत्यादिन्युपनिषद्वाक्यानि "**तमसो मा ज्योतिर्गमय, असतो मा सद्गमय, मृत्योर्मा अमृतं गमय**" इत्यादीनि वैदिकवचनानि च अमृतत्वमेव उपदिशन्ति। श्रीमद्भगवद्गीतायामपि परमात्मनः दर्शनमेव ज्ञानस्य स्वरूपं निर्दिष्टमस्ति –

**अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।**
**एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥6**

एवञ्च ज्ञानस्य फलमस्ति–परमात्मनः सह एकीभावः। न्यरूपि चैतद्गीतायाम् –

**इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।**
**सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥7** इति।

इत्थञ्च समग्रमपि शास्त्रं जीवनस्य विद्यायाश्च अमृतत्वस्य प्राप्तिरेव परमप्रयोजनत्वेन मन्यते –

**यदा सर्वे प्रमुच्यन्ते कामाः येऽस्य स्थिताः।**
**अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥8** इति।

एतदमृतात्मकस्योद्देश्यस्य प्राप्त्यर्थं त्रयः राजपन्थानः "**प्रस्थानत्रयम्**" इति नाम्ना विद्यन्ते शास्त्रेषु। प्रस्थानत्रयश्चास्ति–श्रुतिप्रस्थानम्, स्मृतिप्रस्थानम्, न्यायप्रस्थानञ्च। तत्र श्रुतिस्थानं "**उपनिषद्**" नाम्ना, स्मृतिप्रस्थानम् "**भगवद्गीता**" नाम्ना, न्यायप्रस्थानञ्च "**ब्रह्मसूत्र**" नाम्ना प्रसिद्धमस्ति। उपनिषत्सु मन्त्राः, ब्रह्मसूत्रे सूत्राणि, भगवद्गीतायाञ्च श्लोकाः सन्ति। तत्र भगवद्गीता नाम जगत्स्थितिकारणप्रवृत्ति–



निवृत्तिलक्षणवैदिकधर्मपरमार्थतत्त्वावबोधनरूपमहिम्ना, संशयविपर्ययावस्पृशन्त्या, सतर्कशुध्या प्रतिपादनसरण्या, अकृत्रिमयौजस्विन्या भारत्या, अस्थूलकृशया मूर्त्या, रसानुगुण्या पदसंहत्या, नादमधुरया छन्दोविचित्या, अन्यैश्च तैस्तैर्गुणविशेषैः विष्वक्प्रकृष्यमाणा अशेषस्य वाङ्मयप्रपञ्चस्य परमोपनिषदेवास्ति। न केवलं भारतवर्षे, न केवलं संस्कृतभाषायामेव अपि तु सकलेऽपि वसुमतीतले सर्वास्वपि च भाषासु नास्ति कश्चिदन्यो ग्रन्था योऽस्यास्तुलामारोहेदिति निश्चप्रचमेव समेषां विदुषां मतम्।

सा चेयं श्रीभगवन्मुखारविन्दात् निःसृता बादरायणशाण्डिल्यादिभिर्महर्षिभिर्मीमांसितार्था, बोधयनादिभिर्धर्माचार्यैरादृता, पाद्मवाराहादिमहापुराणैरुदाहृतमाहात्म्या, सर्वविषयावगाहित्वेन ज्ञानविज्ञानसमन्विता, श्रुतीनामाश्यपरिगृहीता, परश्शतैः प्राचीनैराचार्यैः प्रज्ञावद्भिश्च व्याख्याता, सम्प्रत्यपि पौरस्त्यै पाश्चात्यैश्च पण्डितैः सादरं परिशील्यमाना, अध्यात्मविद्याचरमोत्कर्षेण निःश्रेयसपथप्रदर्शिका, आचारविचारशिक्षया च कर्तव्याकर्तव्यप्रदर्शिका समग्रस्यापि पूर्ववर्तिनो वाङ्मयस्य सारमुपस्थापयति। भगवान् वेदव्यासोऽपि स्वसम्पादितेषु वेद–ब्रह्मसूत्र–महाभारत–श्रीमद्भागवत्–श्रीमद्भगवद्गीतानां मध्ये गीताशास्त्रमेव शास्त्रत्वेन प्रतिपादयति– "**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः**[9]" इत्यनेन। स्वयं भगवान् श्रीकृष्णोऽपि इमां गीतां शास्त्रत्वेन प्रतिष्ठापयति– "**इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ। एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत**[10]" इत्यादिना।

वस्तुतः हितं शास्त्रीति शास्त्रम्[11] इति रीत्या इयं सर्वदर्शनगर्भा, सर्वशास्त्रमूला, श्रीमद्भगवद्गीता ईश्वरीयविभूतिभिः सम्पन्नस्य भगवतः श्रीकृष्णस्य दिव्यवाणी "**या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृता**[12]" इति प्रकारेण परमात्मनि प्रवेशयितुं क्रियात्मकज्ञानात्मकनियमान् निर्दिशति। अतः गीता सार्वकालिकं सार्वभौमं सर्वालौकिकञ्च धर्मशास्त्रमस्ति यत्र वेदानामुपनिषदाञ्चात्मतत्त्वमनुप्राणितमस्ति। अस्यां श्रीकृष्णार्जुनसंवादात्मिकायां श्रीमद्भगवद्गीतायामष्टादशाध्यायाः सप्तशतसङ्ख्यकाश्च श्लोकाः सन्ति। अत्र प्रत्येकमध्यायः विशिष्टपुष्पिकया पुष्पितोऽस्ति। तद्यथा प्रथमाध्यायस्य पुष्पिका – '**ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथमाऽध्यायः**" इति। अत्र "**ॐ तत् सत्**" इति पुष्पिकास्थवाक्यं श्रीमद्भगवद्गीतायाः विशिष्टं माहात्म्यं प्रकटयति। "**ॐ तत् सत्**" द्वारा अत्र सच्चिदानन्दघनब्रह्मणो निर्देशः। यथा चोक्तं गीतायाम्–

**ॐ तत् सत् इति निर्देशो ब्रह्मणस्त्रिविधः स्मृत।**
**ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥**

**तस्मात् 'ओम' इत्युदाहृत्य यज्ञदानतपः क्रिया।**
**प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥**

**'तद' इत्यनभिसन्धाय फलं यज्ञतपः क्रियाः।**
**दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥**

**सद्भावे साधुभावे च 'सत' इत्येतत् प्रयुज्यते।**
**प्रशस्ते कर्मणि तथा 'सत' शब्दः पार्थ युज्यते॥**

**यज्ञे तपसि दाने च स्थितिः 'सत' इति चोच्यते।**
**कर्म चैव तदर्थीयं 'सत' इत्येवाभिधीयते॥**[13] इति।

एवञ्च **"ॐ तत् सत्"** एतद् द्वारा अर्थात् प्रणवादेव सृष्ट्यादौ ब्राह्मणानां वेदानां यज्ञानाञ्चोत्पत्तिः जाता[14]। अतः **"ॐ तत् सत्"** इत्युच्चारणं परमात्मानं प्रति अस्मान् प्रवर्तयति, शास्त्रविहितकर्तव्यकर्मणाम् अङ्गवैगुण्यं मार्जयति। तथा च सति ओंकारोच्चारणेन श्लोक-पद-अक्षराणामुच्चारणसम्बन्धिवैगुण्य-परिमार्जनार्थं, **"तत्"** इत्युच्चारणेन भगवत्प्रीत्यर्थं, **"सत्"** इत्युच्चारणेन प्रपञ्चं प्रति वैराग्योत्पादनाय, भगवता सह नित्यसम्बन्धस्मरणाय, **"इति"** इत्युच्चारणेन अत्र मम व्यक्तिगतप्रयोजनं नास्ति, एतदेव परमप्रयोजनं विद्यते इति द्योतनाय **"ॐ तत् सत् इति"** एतत् त्रितयस्य अत्र पुष्पिकायां प्रयोगः विहितः।


तदनन्तरं पुष्पिकावाक्ये **"श्रीमद्भगवद्"** इति पदमस्ति। **"श्रीमत्"** अर्थात् सर्वशोभासम्पन्नः। **"भगवान्"** इति शब्दस्यार्थस्तु सम्पूर्णैश्वर्य-धर्म-कीर्ति-श्री-ज्ञान-वैराग्येति षडैश्वर्यसम्पन्नः इति भवति[15]। प्रकृते षडैश्वर्यसम्पन्नस्य भगवतः श्रीकृष्णस्य श्रीमुखाद्विनिःसृतत्वात् **"श्रीमद्भगवत्"** इति पदम्। परमप्रसन्नेन भगवता श्रीकृष्णेन परमं भक्तं परमं मित्रं श्रीमन्तम् अर्जुनं प्रति विहितगायनात् **"गीतासु"** (गीतम्) इति पदम्। **"गीतासु"** पदमिदं अग्रिमस्य **"उपनिषत्सु"** इति पदस्य विशेषणम्। यद्यपि व्याकरणदृष्ट्या गीतायाः एकत्वात् अत्र **"गीतम्"** इति भवितव्यं तथापि उपनिषत्स्वरूपत्वात्, उपनिषच्छब्दस्य विशेषणत्वाच्च **"गीतासु"** इति पदं प्रयुक्तमस्ति।

श्रीमद्भगवद्गीतायां सर्वासामपि उपनिषदां सारतत्त्वं विद्यते। अपि च साक्षात् पद्मनाभस्य श्रीमुखात् विनिःसृतत्वात् अस्याः गीतायाः मन्त्रस्वरूपं विद्यते। अतः उपनिषदां बहुत्वात् **"उपनिषत्सु"** इति पदमभिहितमस्ति। एवञ्च समेषामुपनिषदां मध्ये भगवद्वाणी गीता अपि अन्यतमा उपनिषत्स्वरूपा वर्तते। यत्र ब्रह्मविद्या अर्थात् ज्ञानयोगः, योगशास्त्रम् अर्थात् कर्मयोगः, श्रीकृष्णार्जुनसंवादः अर्थात् भक्तियोगः – एतस्य त्रितयस्य समवायः सन्निविष्टोऽस्ति। अतः **"गीतासु" "उपनिषत्सु"** इत्यत्र बहुवचनस्य प्रयोगो विहितः। अपरमदस्समाधानं वक्तुं शक्यते यत् श्रीमद्भगवद्गीता महाभारतस्य भीष्मपर्वणि विद्यते। महाभारते अन्याः अपि बहवो गीताः सन्ति। तत्र तासु गीतासु इयं श्रीकृष्णार्जुन-संवादात्मिका गीता अपि विद्यते अतः **"गीतासु"** इति बहुवचनप्रयोगः। सर्वविषयावगाहित्वेन ज्ञानविज्ञानसमन्विता इयं भगवद्गीता वर्ण-आश्रम-जाति-समुदायादीनाम् आग्रहं विना प्राणिमात्रं कल्याणकर्तृत्वात् सर्वासां विद्यानां मूर्धन्यत्वाच्च ब्रह्मविद्यास्वरूपा वर्तते। अत अत्र **"ब्रह्मविद्यायाम्"** इति पदप्रयोगः। ब्रह्मविद्यास्वरूपायामस्यां भगवद्गीतायां कर्मयोग-ध्यानयोग-भक्तियोगादीनां योग-साधनानां च शिक्षा सम्पादिता। अतः यथा साधकः परमात्मनः नित्यस्वरूपं सर्वदाऽनुभवेत् तदर्थं **"योगशास्त्रे"** इति पदं समाहितम्।



उपनिषत्स्वरूपा मातृवद्धितकारिणी इयं भगवद्गीता योगाचार्यस्य श्रीकृष्णस्य परमभक्तशिष्यस्य च मध्ये संवादरूपा वर्तते। भगवद्भक्तयोर्मध्ये, गुरुशिष्ययोर्मध्ये विद्योपादानव्यापाररूपा, अद्भुतरोमाञ्चकारी अस्ति। अत्र अर्जुनः निस्सङ्कोचभावेन स्वगुरुं[16] श्रीकृष्णं प्रति प्रश्नानां धाराप्रवाहं प्रवाहयति। श्रीकृष्णोऽपि स्वशिष्यभक्तं प्रति उदारतापूर्वकं, स्नेहपूर्वकम्, उदाहरणपूर्वकं, कुशलतापूर्वकं, युक्तिपूर्वञ्च समाधानं करोति। इत्थञ्च एतदुभयनाम्ना गीताशास्त्रस्य विशिष्टसम्बन्धकारणादत्र **"श्रीकृष्णार्जुनसंवादे"** इति पदप्रयोगः। एवञ्च प्रत्येकं अध्यायस्य विशिष्टनामपुरस्सरं पुष्पिकेयं पुष्पिता भवति। इति शम्॥

**जानकीशरण**
सहायकाचार्य (सर्वदर्शनविभाग)
श्रीसोमनाथ संस्कृत विश्वविद्यालय
वेरावल (गुजरात)




**सन्दर्भग्रन्थाः –**

1. वैशिषिकसूत्रम् 1/1/2
2. मुण्डकोपनिषत् 1/1/4-5
3. विष्णुपुराणम् 1/19/41
4. ईशोपनिषत् 11
5. केनोपनिषत् 2-4
6. श्रीमद्भगवद्गीता 13/11
7. श्रीमद्भगवद्गीता 14/2
8. कठोपनिषत् 2/3/14, बृहदारण्यकोपनिषत् 4/4/7
9. महाभारतम् अश्व 43/1
10. श्रीमद्भगवद्गीता 1520
11. प्रवृत्तिर्वा नित्येन कृतकेन वा। पुंसा येनापदिश्येत तच्छास्त्रमभिधीयते॥ मीमांसाश्लोकवार्तिकम् 5/5/4
12. महाभारत् भीष्म 43/11
13. श्रीमद्भगवद्गीता 17/23 तः 26
14. "अस्य महत् भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि"। बृहदारण्यकोपनिषत् 2/4/10
15. ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा॥ उत्पत्तिञ्च विनाशञ्च भूतानामिति गतिम्। वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति॥
16. "शिष्यस्तेहं शाधि मां त्वां प्रपन्नम्।" (गीता, 2-7) इत्यनेन अर्जुनस्य शिष्यत्वं विहितम्।